श्री शिव महिम्नः स्तोत्रं

श्री शिव महिम्नः स्तोत्रं

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः |
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः || 1 ||

अतीतः पंथानं तव च महिमा वाङ्मनसयो-
-रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि |
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्ववर्वाचीने पतति न मनः कस्य न वचः || 2 ||

मधुस्फीता वाचः परममृतं निर्मितवत-
-स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदं |
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता || 3 ||

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु |
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहंतुं व्याक्रोशीं विदधत इहैके जडधियः || 4 ||

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च |
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः || 5 ||

अजन्मानो लोकाः किमवयववंतोऽपि जगता-
-मधिष्ठातारं किं भवविधिरनादृत्य भवति |
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे || 6 ||

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च |
रुचीनां वैचित्र्यादृजुकुटिल नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव || 7 ||

महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तंत्रोपकरणं |
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति || 8 ||

ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये |
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवंजिह्रेमि त्वां न खलु ननु धृष्टा मुखरता || 9 ||

तवैश्वर्यं यत्नाद्यदुपरि विरिंचिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कंधवपुषः |
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति || 10 ||

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकंडूपरवशान् |
शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदं || 11 ||

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः |
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः || 12 ||

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
-मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः |
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
-र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः || 13 ||

अकांडब्रह्मांडक्षयचकितदेवासुरकृपा-
-विधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः |
स कल्माषः कंठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः || 14 ||

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तते नित्यं जगति जयिनो यस्य विशिखाः |
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः || 15 ||

मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं |
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता || 16 ||

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते |
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
-त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः || 17 ||

रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो
रथांगे चंद्रार्कौ रथचरणपाणिः शर इति |
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडंबरविधि-
-र्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः || 18 ||

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
-र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलं |
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगतां || 19 ||

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते |
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः || 20 ||

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
-मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः |
क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः || 21 ||

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा |
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः || 22 ||

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि |
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
-दवैति त्वामद्धा बत वरद मुग्धा युवतयः || 23 ||

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
-श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः |
अमंगळ्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मंगळमसि || 24 ||

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः |
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यंतस्तत्त्वं किमपि यमिनस्तत् किल भवान् || 25 ||

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
-स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च |
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि || 26 ||

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
-नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति |
तुरीयं ते धाम ध्वनिभिरवरुंधानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदं || 27 ||

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
-स्तथा भीमेशानाविति यदभिधानाष्टकमिदं |
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते || 28 ||

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः |
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः || 29 ||

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः |
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः || 30 ||

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः |
इति चकितममंदीकृत्य मां भक्तिराधा-
-द्वरद चरणयोस्ते वाक्यपुष्पोपहारं || 31 ||

असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी |
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति || 32 ||

असुरसुरमुनींद्रैरर्चितस्येंदुमौळे-
-र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य |
सकलगणवरिष्ठः पुष्पदंताभिधानः
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार || 33 ||

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः |
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च || 34 ||

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः |
अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परं || 35 ||

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः |
महिम्नः स्तव पाठस्य कलां नार्हंति षोडशीं || 36 ||

कुसुमदशननामा सर्वगंधर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः |
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः || 37 ||

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः |
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदंतप्रणीतं || 38 ||

आसमाप्तमिदं स्तोत्रं पुण्यं गंधर्वभाषितं |
अनौपम्यं मनोहारि शिवमीश्वरवर्णनं || 39 ||

इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः |
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः || 40 ||

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर |
यादृशोऽसि महादेव तादृशाय नमो नमः || 41 ||

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः |
सर्वपापविनिर्मुक्तः शिवलोके महीयते || 42 ||

श्रीपुष्पदंतमुखपंकजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण |
कंठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः || 43 ||

इति श्रीपुष्पदंत विरचितं श्री शिव महिम्नः स्तोत्रं |